रिति" (१२,५ यजु०) "प्रतिमन्त्रमगन्त्युद्‌ग्रभणं च तस्मिंस्तस्मिन्" ११ सू० । "तस्मिन् क्रमणे" क० । "अक्रमश्चतुर्थे" १२सू०। "उद्‌ग्रहणं तु भवत्येव" क० । दिशो वीक्षते दिशोऽनुविक्रमस्वेति (१२,५) १३सू० 'प्रतिदिशं मन्त्रः" क० । 'पिण्डवत्प्रागुदञ्चं प्रगृह्णात्यक्रन्ददग्निरिति" ( १२,६ ) १४ सू० । पिण्डवदित्यूर्ध्वबाहुः (३,८) क० । 'अवरोहत्यग्नेऽभ्यावर्तिन्निति" ( १२,७ ) १५सू० "प्रत्यवरोहत्यग्निम् यावत्कृत्य ऊर्ध्वोऽवरोहतीति" (६,७,३,६) 'श्रुतेस्तद्वत्प्रत्यवरोहणम्" कर्कः । "उपरिनाभि धारयन्ना त्वाहार्षमित्यभिमन्त्रयते"(१२,११) १६सू०। "अग्निम्"क०। 'पाशा उन्मुच्योदुत्तममिति"(१२,१२) 'पिण्डवत्प्राग्दक्षिणा प्रगृह्णात्यग्ने बृहन्निति"(१२,१३) १७सू० । "अवहरति हंसः शुचिषदिति" (१२,१४) । १८ सू० । "आसन्द्यां करोति बृहदिति" ( १२,१४ ) १९सू०। "उपतिष्ठते सीद त्वमिति" (१२,१५) २०सू० । "वात्सप्रेण च दिवस्परीत्येकादशभिः" (१२,१८,२८) २१सू०। "उपतिष्ठते"क०। "अनुवाकेनैके" (१२,१८,२९) २२सू०। "उपतिष्ठन्ते" क०। "अत्र दीक्षितोऽयमिति" २३सू०। "अस्मिन्नवसरे दीक्षितोऽयमित्याह (७,४,११) "दण्डान्ते ह्युखाधिश्रपणाद्युक्तम् अतः प्राकृतानुवृत्त्यर्थमिदमुच्यते" क० । "आवृत्तिरतः संवत्सरम्" २४सू०। "अत ऊर्ध्वं यदुच्यते तत् संवत्सरं यावदावर्तते" क० । "अत ऊर्ध्वं यत्कर्मोच्यते भस्मोद्वपनादि तस्य संवत्सरं यावदावृत्तिर्भवति" संग्र० । ५कण्डिका

'उखाया भस्मोद्वपनमस्तमिते पात्रे" १सू० । "तच्च प्राग्वाग्विसर्गात्" "भस्मोदुप्य वाचं विसृजत" इति श्रुतेः (६,७,४,१४) क०। "भस्मोद्वपनं भस्मोद्धरणम्" संग्र० । "वाचं विसृज्य समिदाधानं रात्रौं रात्रीमप्रयावमिति" (११,७५) २सू० । 'एवमुदिते भस्मोद्वपनादि" ३सू० । "कर्तव्यम् अयं तु विशेषः"क०। "अहरहरित्याधानम्" (११,७५) ४सू० । "विष्णुक्रमवात्सप्रे चाहर्व्यत्यासमुदिते समिधमाधाय" ५सू० । "अहर्व्यत्यासेन कर्तव्ये"क० "अस्मिन्दिने विष्णुक्रमाः उत्तरस्मिन्वात्सप्रम् एवं यावद्दीक्षं कर्तव्यम्" संग्र० । "रुक्मप्रतिमोचनादि प्राग्वात्सप्राद्विष्णुक्रमाः" ६सू०। "तयोर्विभागमाह । साग्निके क्रतौ संवत्सरं दीक्षा आम्नाताः संवत्सरमित्युपक्रम्य चिन्वीतेति (१०,२,६,९) पवित्रे चतस्रो दीक्षा आम्नाताः पवित्रश्चतुर्दीक्ष इति (१५,१,४) तत्राग्नौ सति चिन्त्यते किमग्निनिमित्ता दीक्षा भवन्तु उत सौमिक्य इति उभयं चैतच्चरितार्थम् पवित्राद्बहिराग्निक्यश्चरितार्थाः अनग्निके च पवित्रे सौमिक्य इति तेन साग्निमति पवित्रे कथं भवत्विति नियमकारणाभावादनियमे प्राप्त आह" क० 'सोमाविरोधेन वा तत्प्रधान्यात्" ७सू० । 'सोमस्य प्रधानभूतत्वात् तदीया एव दीक्षा भवन्ति" क० "सोमयागेनाविरोधः सोमाविरोधः तेनाविरोधेनैव दीक्षा भवति वावधारणे कुतः तत्प्रधान्यात् सोमस्य प्राधान्यात् अग्नेश्च तदङ्गत्वात् तेन द्वादशाहे वाजपेये द्वादश सप्तदश वा भवन्ति नाग्निप्रयुक्तसंवत्सरदीक्षाः" संग्र० । "न्यज्य समिधं व्रते प्रत्ते-प्रत्तेऽन्नपतइत्याधानम् । (११,८३) ८सू० "उख्येऽग्नौ यजमानः करोति" संग्र० । "संवत्सरभृतिनोऽसंवत्सरभृतेऽपि" ९सू० । पूर्वं कस्मिंश्चिद्यज्ञे साग्निके येनैकवारं संवत्सरमुख्योऽग्निर्भृतो भवति स संवत्सरभृतो तस्यासंभृतेऽप्युख्येऽग्नौ चयनं भवति ( ९,५,१,६५ ) संग्र० 'संवत्सरं सोष्यतः" १० सू०। "संवत्सरमभिषवं करिष्यतः असंवत्सरभृतेऽपि चयनं भवति (९,५,१ ६६) क० । "संवत्सराहिताग्नेः" ११सू०। "असंवत्सरभृतेऽपि चयनमिष्यते" (९,६,१,६७) क० । "जातस्य च" १२सू० । "संवत्सरे जातस्य च असंवत्सरभृतेऽपि चयनं भवति" ( ९,५,१,६८ ) क० । "गर्भाधानदिनादारभ्य संवत्सरे पूर्णेऽतीते वा यो जातस्तस्य भवति" संग्र० । 'षाण्मास्यमन्त्यम्" १३सू० । "'अन्त्यं जघन्यमिदं पक्षान्तरम् षण्मासानुख्यभरणं कृत्वाग्निश्चीयत इति (९,५,१,६२)क०। "षाण्मास्यं षण्मासानुख्यमग्निं भृत्वा चयनं भवति" संग्र० । "अचयनं वा परस्मै" १४सू० । चयनं वेति विकल्पः एवं हि श्रूयते (९, ५,२,१२) त्रयो ह वै" इत्युपक्रम्य परस्मै करोतीति निन्दार्थवादः प्रतिषेधार्थः तस्मादप्येवंवित् कामं परस्मा अग्निं चिनुयादिति ९,५,२,३, प्रतिप्रसवः अतः प्रतिषेधप्रतिप्रसवाभ्यां विकल्पः" संग्र० । "प्रागनः कृत्वोख्यस्योत्तरतः समिदाधानं समिधाग्निमिति (१२,३०)१५सू०। "उख्यपुरतः प्राङ्मुखमनः कृत्वोख्यएव समिदाधानम्"क० । "सासन्दीकमुद्यम्योदुत्वेति (१२,६१) दक्षिणतोऽनसि करोति" १६सू० । "सासन्दीकमुख्यमुदु त्वेत्युत्क्षिप्यानसो दक्षिणतोऽवस्थितोऽनसि करोति" कर्कः । "स्थाल्यां गार्हपत्यं पश्चात्" १७सू० । "अनसि करोति दक्षिणाग्निं च वितृतीये करोति"क०। "अनड्वाहौ युक्त्वा